श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્દ્ભાગવત રસિક કુટુંબ

## UG-11.25 - પંચમ સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.**
**દેવીં(મ્) સરસ્વતીં(વ઼ઁ) વ્યાસં(ન્), તતો જયમુદીરયેત્.**

**નામસઙ્કીર્તનં(યઁ) યસ્ય, સર્વપાપપ્રણાશનમ્.**
**પ્રણામો દુ:ખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.**

**શ્રીમદ્ભાગવતમહાપુરાણમ્**

**એકાદશઃ સ્કન્ધઃ**

**..અથ પઞ્ચવિંશોઽધ્યાયઃ - ૨૫ ..**

**શ્રીભગવાનુવાચ**

**ગુણાનામસમિશ્રાણાં(મ્), પુમાન્ યેન યથા ભવેત્ .**
**તન્મે પુરુષવર્યેદ- મુપધારય શં(મ્)સતઃ .. ૧..**

**શમો દમસ્તિતિક્ષેક્ષા, તપઃ(સ્) સત્યં(ન્) દયા સ્મૃતિઃ .**
**તુષ્ટિસ્ત્યાગોઽસ્પૃહા શ્રદ્ધા, હ્રીર્દયાદિઃ(સ્) સ્વનિર્વૃતિઃ .. ૨..**

**કામ ઈહા મદસ્તૃષ્ણા, સ્તમ્ભ આશીર્ભિદા સુખમ્ .**
**મદોત્સાહો યશઃ(ફ્) પ્રીતિર્ -હાસ્યં(વ઼ઁ) વીર્યં(મ્) બલોદ્યમઃ .. ૩..**

ક્રોધો લોભોઽનૃતં(મ્) હિં(મ્)સા, યાચ્ઞા દમ્ભઃ(ખ્) ક્લમઃ(ખ્) કલિઃ .
શોકમોહૌ વિષાદાર્તી, નિદ્રાઽઽશા ભીરનુદ્યમઃ .. ૪..

સત્ત્વસ્ય રજસશ્ચૈતાસ્- તમસશ્ચાનુપૂર્વશઃ .
વૃત્તયો વર્ણિતપ્રાયાઃ(સ્), સન્નિપાતમથો શૃણુ .. ૫..

સન્નિપાતસ્ત્વહમિતિ, મમેત્યુદ્ધવ યા મતિઃ .
વ્યવહારઃ(સ્) સન્નિપાતો, મનો માત્રેન્દ્રિયાસુભિઃ .. ૬..

ધર્મે ચાર્થે ચ કામે ચ, યદાસૌ પરિનિષ્ઠિતઃ .
ગુણાનાં(મ્) સન્નિકર્ષોઽયં(મ્), શ્રદ્ધારતિધનાવહઃ .. ૭..

પ્રવૃત્તિલક્ષણે નિષ્ઠા, પુમાન્ યર્હિ ગૃહાશ્રમે .
સ્વધર્મે ચાનુતિષ્ઠેત, ગુણાનાં(મ્) સમિતિર્હિ સા .. ૮..

પુરુષં(મ્) સત્ત્વસં(યઁ)યુક્ત-મનુમીયાચ્છમાદિભિઃ .
કામાદિભી રજોયુક્તં(ઙ્), ક્રોધાદ્યૈસ્તમસા યુતમ્ .. ૯..

યદા ભજતિ માં(મ્) ભક્ત્યા, નિરપેક્ષઃ(સ્) સ્વકર્મભિઃ .
તં(મ્) સત્ત્વપ્રકૃતિં(વઁ) વિદ્યાત્, પુરુષં(મ્) સ્ત્રિયમેવ વા .. ૧૦..

યદા આશિષ આશાસ્ય, માં(મ્) ભજેત સ્વકર્મભિઃ .
તં(મ્) રજઃ(ફ્)પ્રકૃતિં(વઁ) વિદ્યાદ્ -ધિં(મ્)સામાશાસ્ય તામસમ્ .. ૧૧..

સત્ત્વં(મ્) રજસ્તમ ઇતિ, ગુણા જીવસ્ય નૈવ મે .
ચિત્તજા યૈસ્તુ ભૂતાનાં(મ્), સજ્જમાનો નિબધ્યતે .. ૧૨..

યદેતરૌ જયેત્ સત્ત્વં(મ્),ભાસ્વરં(વ઼્ઁ) વિશદં(મ્) શિવમ્ .
તદા સુખેન *યુંજ્યેત, ધ*ર્મજ્ઞાનાદિભિઃ(ફ્) પુમાન્ .. ૧૩..

યદા જયેત્તમઃ(સ્) સત્ત્વં(મ્), રજઃ(સ્) સં(ઙ્) ગં(મ્) ભિદા ચલમ્ .
તદા દુઃખેન *યુંજ્યેત, કર્મણા યશસા શ્રિયા .. ૧૪..

યદા જયેદ્ રજઃ(સ્) સત્ત્વં(ન્), તમો મૂઢં(લ઼્ઁ) લયં(ઞ્) જડમ્ .
*યુંજ્યેત શોકમોહાભ્યાં(ન્), *નિદ્રયા હિં(મ્)સયાऽऽશયા .. ૧૫..

યદા ચિત્તં(મ્) પ્રસીદેત, ઇન્દ્રિયાણાં(ઞ્) ચ નિર્વૃતિઃ .
દેહેऽભયં(મ્) મનોऽસં(ઙ્)ગં(ન્), તત્ સત્ત્વં(વ઼્ઁ) *વિદ્ધિ *મત્પદમ્ .. ૧૬..

વિકુર્વન્ ક્રિયયા ચાધી-રનિવૃ*ત્તિશ્ચ ચેતસામ્ .
ગાત્રાસ્વાસ્થ્યં(મ્) મનો ભ્રાન્તં(મ્) રજ એતૈર્નિશામય .. ૧૭..

સીદચ્ચિત્તં(વ઼્ઁ) વિલીયેત, ચેતસો ગ્રહણેऽક્ષમમ્ .
મનો *નષ્ટં(ન્) તમો ગ્લા*નિસ્- ત*મસ્તદુપધારય .. ૧૮..

એધમાને ગુણે સત્ત્વે, દેવાનાં(મ્) બલમેધતે .
અસુરાણાં(ઞ્) ચ રજસિ, ત*મ*સ્યુદ્ધવ *રક્ષસામ્ .. ૧૯..

સત્ત્વાજ્જાગરણં(વ઼્ઁ) *વિદ્યાદ્ રજસા સ્*વપ્નમાદિશેત્ .
*પ્રસ્વાપં(ન્) તમસા *જન્તોસ્ -તુરીયં(ન્)ત્રિષુ *સન્તતમ્ .. ૨૦..

ઉપર્યુપરિ *ગ*ચ્છન્તિ, સત્ત્વે*ન બ્રાહ્મણા જનાઃ .
તમસાધોऽધ આ*મુખ્યાદ્, રજસાન્તરચારિણઃ .. ૨૧..

સત્ત્વે પ્રલીનાઃ(સ્) સ્વર્યાન્તિ, નરલોકં(મ્) રજોલયાઃ .
તમોલયાસ્તુ નિરયં(યૢઁ), યાન્તિ મામેવ નિર્ગુણાઃ .. ૨૨..

મદર્પણં(ન્) નિષ્ફલં(વૢઁ) વા, સાત્ત્વિકં(ન્) નિજકર્મ તત્ .
રાજસં(મ્) ફલસં(ઙ્)કલ્પં(મ્), હિં(મ્)સાપ્રાયાદિ તામસમ્ .. ૨૩..

કૈવલ્યં(મ્) સાત્ત્વિકં(ઞ્) જ્ઞાનં(મ્), રજો વૈકલ્પિકં(ઞ્) ચ યત્ .
પ્રાકૃતં(ન્) તામસં(ઞ્) જ્ઞાનં(મ્), મન્નિષ્ઠં(ન્) નિર્ગુણં(મ્) સ્મૃતમ્ .. ૨૪..

વનં(ન્) તુ સાત્ત્વિકો વાસો, ગ્રામો રાજસ ઉચ્યતે .
તામસં(ન્) દ્યૂતસદનં(મ્) મન્નિકેતં(ન્) તુ નિર્ગુણમ્ .. ૨૫..

સાત્ત્વિકઃ(ખ્) કારકોઽસં(ઙ્) ગી, રાગાન્ધો રાજસઃ(સ્) સ્મૃતઃ .
તામસઃ(સ્) સ્મૃતિવિભ્રષ્ટો, નિર્ગુણો મદપાશ્રયઃ .. ૨૬..

સાત્ત્વિક્યાધ્યાત્મિકી શ્રદ્ધા, કર્મશ્રદ્ધા તુ રાજસી .
તામસ્યધર્મે યા શ્રદ્ધા, મત્સેવાયાં(ન્) તુ નિર્ગુણા .. ૨૭..

પથ્યં(મ્) પૂતમનાયસ્ત-માહાર્યં(મ્) સાત્ત્વિકં(મ્) સ્મૃતમ્ .
રાજસં(ઞ્) ચેન્દ્રિયપ્રેષ્ઠં(ન્), તામસં(ઞ્) ચાર્તિદાશુચિ .. ૨૮..

સાત્ત્વિકં(મ્) સુખમાત્મોત્થં(વૢઁ), વિષયોત્થં(ન્) તુ રાજસમ્ .
તામસં(મ્) મોહદૈન્યોત્થં(ન્), નિર્ગુણં(મ્) મદપાશ્રયમ્ .. ૨૯..

દ્રવ્યં(ન્) દેશઃ(ફ્) ફલં(ઙ્) કાલો, જ્ઞાનં(ઙ્) કર્મ ચ કારકઃ .
શ્રદ્ધાવસ્થાકૃતિર્નિષ્ઠા, ત્રૈગુણ્યઃ(સ્) સર્વ એવ હિ .. ૩૦..

સર્વે ગુણમયા ભાવાઃ(ફ્), પુરુષાવ્યક્તધિષ્ઠિતાઃ .
દૃષ્ટં(મ્) શ્રુતમનુધ્યાતં(મ્) બુદ્ધ્યા વા પુરુષર્ષભ .. ૩૧..

એતાઃ(સ્) સં(મ્)સૃતયઃ(ફ્) પું(મ્)સો, ગુણકર્મનિબન્ધનાઃ .
યેનેમે નિર્જિતાઃ(સ્) સૌમ્ય, ગુણા જીવેન ચિત્તજાઃ .
ભક્તિયોગેન મન્નિષ્ઠો, મદ્ભાવાય પ્રપદ્યતે .. ૩૨..

તસ્માદ્ દેહમિમં(લ્ઁ) લબ્ધ્વા, જ્ઞાનવિજ્ઞાનસમ્ભવમ્ .
ગુણસં(ઙ્)ગં(વ્ઁ) વિનિર્ધૂય, માં(મ્) ભજન્તુ વિચક્ષણાઃ .. ૩૩..

નિઃસં(ઙ્)ગો માં(મ્) ભજેદ્ વિદ્વા- નપ્રમત્તો જિતેન્દ્રિયઃ .
રજસ્તમશ્ચાભિજયેત્, સત્ત્વસં(મ્)સેવયા મુનિઃ .. ૩૪..

સત્ત્વં(ઞ્) ચાભિજયેદ્ યુક્તો, નૈરપેક્ષ્યેણ શાન્તધીઃ .
સમ્પદ્યતે ગુણૈર્મુક્તો, જીવો જીવં(વ્ઁ) વિહાય મામ્ .. ૩૫..

જીવો જીવવિનિર્મુક્તો, ગુણૈશ્ચાશયસમ્ભવૈઃ .
મયૈવ બ્રહ્મણા પૂર્ણો, ન બહિર્નાન્તરશ્ચરેત્ .. ૩૬..

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(મ્)સ્યાં(મ્)
સં(મ્)હિતાયામેકાદશસ્કન્ધે પઞ્ચવિં(મ્)શોડધ્યાયઃ .. ૨૫..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.
ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ